चरित्रं, क्ली, (चर+"अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) स्वभावः । तत्पर्य्यायः । चरितम् २ चारित्रम् ३ चरीत्रम् ४ । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ४ । ८३ ।
"अचिन्त्यं शीलगुप्तानां चरित्रं कुलयोषिताम् ॥")
चरित्रा, स्त्री, (चरित्र+टाप् ।) तिन्तिड़ीवृक्षः । इति शब्दरत्नावली ॥
चरिष्णुः, त्रि, (चरतीति । चर+"अलङ्कृञिति ।" ३ । २ । १३६ । इति इष्णुच् ।) जङ्गमः । इत्यमरः ।३।१।७४ ॥ (यथा, भागवते । २।६।४० ।
"द्रव्यं विकारो गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥")
चरीत्रं, क्ली, (चरित्र+पृषोदरादित्वाद्दीर्घत्वम् ।) चरित्रम् । इति शब्दरत्नावली ॥
चरुः, पुं, (चरन्ति भक्षयन्ति देवा इमं चर्य्यते भक्ष्यते अग्न्यादिभिर्द्देवैरिति वा चरति होमादिकमस्मादित्येके । चर+"भृमृशीति ।" उणां १ । ७ । इति उः ।) हव्यान्नम् । तत्पाकभाण्डम् । इति मेदिनी । रे, ३२ ॥
"ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् ॥"
इति शारदातिलकम् ॥
तस्यानुष्ठानं यथा । अग्नेः पश्चिमायान्दिशि प्रागग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालितं वारुणमुदूखलं मुषलं वैणवञ्च सूर्पं वारुणचमसस्थजलप्रोक्षितं संस्थाप्य व्रीहीन् यवान् वा सूर्पे निधाय चमसस्थजलेन ओं वास्तोष्पतये त्वा जुष्टं प्रोक्षामि ओम् इन्द्राय त्वा जुष्टं प्रोक्षामि ओं भूस्त्वा जुष्टं प्रोक्षामि ओं भुवस्त्वा जुष्टं प्रोक्षामि ओं स्वस्त्वा जुष्टं प्रोक्षामि ओं प्रजापतये त्वा जुष्टं प्रोक्षामि इति तूष्णीं इत्यष्टौ वारान् प्रोक्षयेत् । ततः कांस्यपात्रेण चरुस्थाल्या वा ओं वास्तोष्पतये त्वा जुष्टं निर्व्वपामि ओम् इन्द्राय त्वा जुष्टं निर्व्वपामि ओं भूस्त्वा जुष्टं निर्व्वपामि ओं भुवस्त्वा जुष्टं निर्व्वपामि ओं स्वस्त्वा जुष्टं निर्व्वपामि ओं प्रजापतये त्वा जुष्टं निर्व्वपामि इति प्रत्येकं गृहीत्वा उदूखले स्थापयेत् द्वितूष्णीम् । ततो दक्षिणहस्तमुपरि कृत्वा मुषलेनावहत्य सूर्पेण प्रस्फोटयेत् । इत्थमेव वारत्रयं कृत्वा त्रिः प्रक्षालयेत् । ततश्चरुस्थाल्याममन्त्रकं कृतोत्तराग्रं पवित्रं निक्षिप्य प्रक्षालिततण्डुलं निधाय दुग्धं निक्षिप्य स्तोकं स्तोकमुदकं दत्त्वा तन्मध्ये खदिरपलाशोडुम्बराणामन्यतमस्य प्रादेशप्रमाणं अग्रे उभयतोऽङ्गुष्ठपर्व्वप्रमाणं चतुष्कोणपुष्कलं मेक्षणं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथान्तरूष्मणा सम्यक् पाको भवति गालनं न भवति दाहश्च न भवति ततः सम्यक्पाके भूते मध्ये घृतस्रुवं दत्त्वा प्रागादिदिक्चिह्नितं चरुमवतार्य्य बर्हिरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतस्रुवं दद्यात् । इति भवदेवभट्टः ॥

चरुव्रणः, पुं, (चरोर्व्रण इव ।) पिष्टापूपः । इति त्रिकाण्डशेषः ॥ पिताइ पिठा इति भाषा ॥
चर्च्च, क इह्गमे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इह्गमः अध्ययनम् । क, चर्च्चयति वेदं विप्रः । इति दुर्गादासः ॥
चर्च्च, श उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) रेफोपधः । श, चर्च्चती चर्च्चन्ती । गुणस्थानरहितानां तुदादिपाठफलन्तु शत्रन्तानामादीपोरिति नुम्णो विभाषा वेदेषूच्चारणभेदश्च । इति दुर्गादासः ॥
चर्च्चरी, स्त्री, (चर्च्च+बाहुलकात् अरन् ततो गौरादित्वात् ङीष् ।) गीतभेदः । चर्च्चरी गीतभेदे च केशभित्करशब्दयोरिति रुद्रः ॥ हर्षक्रीड़ेति सुभूतिः । कामटिकानां सादरवचनं तौर्य्यत्रिकञ्चेत्यन्ये । वसन्तसमयक्रीड़ेत्येके । इत्यमरटीकायां भरतः ॥, हर्षक्रीड़ावाक् । तत्पर्य्यायः । चर्भटी २ । इति हेमचन्द्रः ॥ (यथा, रत्नावल्याम् । १ अङ्के । "अये ! मधुरमभिहन्यमानमृदङ्गानुगतसङ्गीतमधुरः पुरः पौराणामुच्चरति चर्च्चरीध्वनिः ॥" एतदुदाहरणं यथा, विक्रमोर्व्वश्याम् । ४ अङ्के । अनन्तरे चर्च्चरीत्युक्ता,—
"गन्धोन्मादितमधुकरगीतै-
र्वाद्यमानैः परभृततूर्य्यैः ।
प्रसरितपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारैर्नृत्यति कल्पतरुः ॥"
वर्णवृत्तविशेषः । यथा, शब्दार्थचिन्तामणौ ।
"हारयुक्तसुवर्णकङ्कणपाणिशङ्खविराजिता
पादनूपुरसङ्गता सुपयोधरद्वयभूषिता ।
शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता
चर्च्चरी तरुणीव चेतसि चाकसीति सुसङ्गता ॥")
चर्च्चरीकः, पुं, (चर्च्च+"फर्फरीकादयश्च ।" उणां ४ । २० । इति ईकन्प्रत्ययान्तेन निपातनात् साधुः ।) महाकालः । केशविन्यासः । शाकः । इति मेदिनी । के, १८७ ॥
चर्च्चा, स्त्री, (चर्च्च्यते विचार्य्यते वेदवेदान्तादितत्त्वशास्त्रैरसौ इति । चर्च्च+णिच्+अङ् ।) दुर्गा । चिन्ता । चार्च्चिक्यम् । इति मेदिनी । चे, ४ ॥ विचारणा । इत्यमरः । १ । ५ । २ ॥ (चर्च्च+भावे अङ् । लेपनम् । यथा, छन्दोमञ्जर्य्याम् । १५ । ४ ।
"मृगमदकृतचर्च्चा पीतकौशेयवासाः ॥"
गायत्रीरूपा महाशक्तिः । यथा, देवीभागवते । १२ । ६ । ४६ ।
"ज्ञानधातुमयी चर्च्चा चर्च्चिता चारुहासिनी ॥")
चर्च्चिका, स्त्री, (चर्च्चा+स्वार्थे कन् । कापि अत इत्वम् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ चर्च्चा । इति द्विरूपकोषः ॥ (रोगविशेषः । तदपनोदनं तुषारपानीयं यथा,—
"तौषारं लघुशीतलं श्रमहरं पित्ताग्निशान्तिप्रदं
दोषाणां शमनं जलार्त्तिहननं सर्व्वामयघ्नं परम् ।
कुष्ठश्लीपदचर्च्चिका-विषहरं पामाविसर्पापहं
चीणानां क्षतशोषिणां हितकरं संसेव्यते मानवैः ॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥
(चर्च्चां वेदादिविचारणां वेत्ति इति । ठन् । वेदाद्यध्येतरि, त्रि ॥)
चर्च्चितं, त्रि, (चर्च्च+कर्म्मणि क्तः । चर्च्चा लेपनं सञ्जातास्य इति इतच् वा ।) चन्दनादिना कृतलेपनम् । तत्पर्य्यायः । दिग्धम् २ लिप्तम् ३ । इति जटाधरः ॥ (यथा, गीतगोविन्दे । १।४० ।
"चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली ॥")
चर्त्त्यः, त्रि, (चर्त्त्यते इति । चृत हिंसायाम्+"ऋदुपधाच्चापि चृतेः । ३ । १ । ११० । इति ण्यत् ।) हननीयः । इति पाणिनिव्याकरणम् ॥
चर्पटः, पुं, (चृप्+अटन् ।) स्फारः । विपुलः । चपेटः । पर्पटः । इति मेदिनी । टे, ४१ ॥
चर्पटा, स्त्री, (चर्पट+टाप् ।) भाद्रशुक्लषष्ठी । चापड़ाषष्ठी इति भाषा ॥ अस्या विवरणं चपेटीशब्दे द्रष्टव्यम् ॥
चर्पटी, स्त्री, (चर्पट+ङीष् ।) पोली । इति त्रिकाण्डशेषः ॥
चर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चर्ब्बति । इति दुर्गादासः ॥
चर्भटः, पुं, (चर+क्विप् । भटति भरति स्वशरीरदानेनेति । भट्+अच् । ततः कर्म्मधारयः ।) इर्व्वारुः । इति हलायुधः ॥
चर्भटी, स्त्री, (चर्भट+ङीष् ।) चर्च्चरी । हर्षक्रीड़ावाक् । इति हेमचन्द्रः ॥
चर्म्मं, क्ली, (चर्म्म साधनतयास्त्यस्य अच् ।) फलकः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ७ । १९२ ।
"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ॥")
चर्म्म, [न्] क्ली, (चर+"सर्व्वधातुभ्यो मनिन् ।" उणां । ४।१४५। इति मनिन् ।) इन्द्रियविशेषः । चाम इति भाषा ॥ तत्पर्य्यायः । त्वक् २ असृग्धरा ३ कृत्तिः ४ अजिनम् ५ देहचर्म्म ६ रक्ताधारः ७ रोमभूमिः ८ शरीरावरणम् ९ । इति राजनिर्घण्टः ॥ असृग्वरा १० । इति भरतधृतशब्दार्णवः ॥ (यथा, भागवते ।३।६।१६।
"निर्भिन्नान्यस्य चर्म्माणि लोकपालोऽनिलोऽविशत् ॥")
शरीरावरकं शस्त्रम् । ढाल इति भाषा ॥ तत्पर्य्यायः । फलकः २ फलम् ३ । इत्यमरः । २ । ८ । ९० ॥ फरम् ४ चर्म्मम् ५ । इति भरतः ॥*॥ तस्य लक्षणं यथा, युक्तिकल्पतरौ ।
"शरीरावरकं शस्त्रं चर्म्म इत्यभिधीयते ।
तत् पुनर्द्विविधं काष्ठचर्म्मसम्भवभेदतः ॥
शरीरावरकत्वञ्च लघुता दृढ़ता तथा ।
दुर्भेद्यत्वेति कथिता चर्म्मणां गुणसंग्रहः ॥
स्वल्पता गुरुता चैव मृदुता सुखभेद्यता ।
विरुद्धवर्णता चेति चर्म्मणां दोषसंग्रहः ॥